# Dhumravarna Stotram Shri Kalikritam

# શ્રીકલિકૃતં ધૂમ્રવર્ણસ્તોત્રમ્

## Document Information

Text title : Dhumravarna Stotram Shri Kalikritam

File name : dhUmravarNastotramshrIkalikRRitaM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 16 | 8.16 35-51||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# શ્રીકલિકૃતં ધૂમ્રવર્ણસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
કલિરુવાચ ।
ધૂમ્રવર્ણ નમસ્તુભ્યં સર્વેભ્યઃ સુખદાયક ।
નાનારૂપધરાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૩૫॥
અનન્તપાદહસ્તાયાનન્તબાહુધરાય તે ।
અનન્તમાયયા ગુપ્તપ્રચારિણે નમો નમઃ ॥ ૩૬॥
હેરમ્બાય નમસ્તુભ્યં ભક્તસંરક્ષકાય ચ ।
અભક્તભયદાત્રે તે ગણેશાય નમો નમઃ ॥ ૩૭॥
આદિમધ્યાન્તહીનાયાદિમધ્યાન્તભયાય તે ।
આનન્દેભ્યઃ સદાનન્દદાયિને વૈ નમો નમઃ ॥ ૩૮॥
માયાહીનાય માયાયા આધારાય પરાત્મને ।
માયિભ્યો માયયા મોહદાયિને તે નમો નમઃ ॥ ૩૯॥
કર્મણાં ફલદાત્રે તે જ્ઞાનિભ્યો જ્ઞાનદાયિને ।
આનન્દેભ્યઃ સદાનન્દદાયિને વૈ નમો નમઃ ॥ ૪૦॥
સહજાય નમસ્તુભ્યં સ્વાનન્દાય સમાધયે ।
યોગાય યોગનાથાય બ્રહ્મેશાય નમો નમઃ ॥ ૪૧॥
કસ્ત્વાં સ્તોતું સમર્થઃ સ્યાદ્યત્ર શાન્તિં ગતાઃ પ્રભો ।
વેદાદયો નમામ્યેવ તેન તુષ્ટો ભવાધુના ॥ ૪૨॥
રક્ષ માં ગણનાથ ત્વં દાસં શરણમાગતમ્ ।
અજ્ઞાનયુદ્ધજં દોષં ક્ષમસ્વ કરુણાનિધે ॥ ૪૩॥
એવમુક્ત્વા કલિસ્તસ્ય પાદં ગૃહ્ય પપાત હ ।
તમુવાચ ગણાધ્યક્ષઃ સ્વભક્તં શરણાર્થિનમ્ ॥ ૪૪॥
(ફલશ્રુતિઃ)
ધૂમ્રવર્ણ ઉવાચ ।
મા ભયં કુરુ ધર્મઘ્ન ન હન્મિ ત્વાં કદાચન ।

શરણં માં પ્રપન્નં ચ શ‍ૃણુ મે વચ નોહતમ્ ॥ ૪૫॥
સ્તોત્રં ત્વયા કૃતં મે યત્ કલેર્મલહરં ભવેત્ ।
પઠતે શ‍ૃણ્વતે નિત્યં સર્વકામફલપ્રદમ્ ॥ ૪૬॥
અન્તે સ્વાનન્દદં પૂર્ણં ભવિષ્યતિ કલે પરમ્ ।
દૃઢભક્તિકરં નિત્યં યોગિભ્યો યોગદાયકમ્ ॥ ૪૭॥
તિષ્ઠ ત્વં દ્વેષમુત્સૃજ્ય ધર્મસ્ય સ્વાધિકારતઃ ।
કૃતપ્રાપ્તિં વિજાનીહિ મદાજ્ઞાવશગો ભવ ॥ ૪૮॥
તથેતિ તં નમસ્કૃત્ય કલિઃ સ્વસ્થાનગોઽભવત્ ।
ધૂમ્રવર્ણો દ્વિજાન્ મુખ્યાન્ વસિષ્ઠાદીન્ સમાનયત્ ॥ ૪૯॥
પુનસ્તાન્ સ્થાપ્ય સર્વેશઃ કૃતં તૈઃ સમ્પ્રવર્તયત્ ।
સ્વયમન્તર્હિતો દેવઃ સર્વેભ્યઃ સુખદાયકઃ ॥ ૫૦॥
ધૂમ્રવર્ણાવતારસ્ય ચરિતં કથિતં મયા ।
સર્વસિદ્ધિપ્રદં પૂર્ણં પઠનાચ્છ્રવણાદ્ભવેત્ ॥ ૫૧॥

ઇતિ શ્રીકલિકૃતં ધૂમ્રવર્ણસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૧૬ । ૮.૧૬ ૩૫-૫૧॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 16 . 8.16 35-51..

Proofread by Yash Khasbage, Preeti Bhandare

*Dhumravarna Stotram Shri Kalikritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*